कोश

क्र.नं. २९

मेदिनी

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

५।

मेदिनीकोशपत्र

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

मदि० १

(२)

॥श्रीगणेशायनमः॥ दृषाङ्कायनमस्तस्मैयस्यमौलिविलम्बिनी॥जटावेष्टनजांशोभांवि
भावयजान्हवी॥१॥पूर्वाचार्यकृतीर्वीक्ष्यशब्दशास्त्रंनिरूप्यच॥नानार्थशब्दकोषोयंलिङ्ग
भेदेनकथ्यते॥२॥प्रायशोरूपभेदेनविशेषणवशात्क्वचित्॥स्त्रीपुन्नपुंसकंज्ञेयंविशेषो
क्तेश्चकुत्रचित्॥३॥त्रिलिङ्ग्यांत्रिष्वितिपदंमिथुनेचद्वयोरिति॥निषिद्धलिङ्गंशेषार्थंत्वन्ता
थादिनपूर्वभाक्॥४॥रूपाद्यक्तंलिङ्गमुक्तंलिपिश्रान्तिच्छिदेक्वचित्॥विशेषनिघ्नेऽनुक्तेपि
विज्ञेयावाच्यलिङ्गतां॥५॥गुणेशुक्लादिकद्वाद्याःपुंसिस्युस्तद्वतित्रिषु॥तीक्ष्णाद्याश्चगुणे
क्लीबंगुणिलिङ्गास्तुतद्वति॥६॥क्लीबपुंसोरपिस्त्रीत्वंक्वाप्यल्पत्वविवक्षया॥जातिवाचकश
ब्दानामपिस्त्रीत्वंविवक्षया॥७॥उद्भिदःप्रसवेक्लीबेहरीतक्यादयःस्त्रियाम्॥पुष्पेजातीप्र
भृतयःस्वलिङ्गाव्रीहयःफले॥८॥प्राङ्नानार्थानतल्लिङ्गंद्वयोर्द्वंद्वेनचैकता॥शब्दावृत्तिर्न १

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(2A)

लिङ्गेऽन्त्ये सप्तमी न विशेषणे ॥९॥ क्लीबे नपुंसके पुंस्त्रिस्त्रियां यो भिन्नि च द्वयोः ॥ त्रिषु चेत्यादि यद्रू
पं तल्लिङ्गस्यैव वाचकम् ॥१०॥ नानार्थः प्रथमांतोऽत्र सर्वत्रादौ प्रदर्शितः ॥ सप्तम्यन्ताभिधेये
षु वर्त्तमानो विनिश्चितः ॥११॥ एकद्वित्रिचतुःपञ्चषड्वर्णानुक्रमात्कृतः ॥ स्वरकाद्यादिकाद्या
न्तवर्गैर्नानार्थसंग्रहः ॥१२॥ नानार्थकोषपुस्तकभारार्जनदुःखहानये कृतिनः ॥ मेदिनिक
रकृतकोषो विशुद्धलिङ्गो भिलिख्यतामेकः ॥१३॥ कैकम् ॥ को ब्रह्मणि समीरात्मयमदक्षेषु
भास्करे ॥ कामग्रन्थौ च क्रिणि च पतत्रि पार्थिवे तथा ॥१४॥ मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्ष
जलेषु कम् ॥ कद्वि ॥ अर्कोऽर्कपर्णे स्फटिके खौ ताम्रो दिवस्पतौ ॥१५॥ अङ्को रूपकभेदाङ्गयि
- रेखाजिभूषणे ॥ रूपके शान्तिकोत्सङ्गस्थानेऽङ्कं पापदुःखयोः ॥१६॥ एकं संख्यान्तरे श्रेष्ठे केव
लेतरयोस्त्रिषु ॥ कर्कः कर्कैट्सिते वन्हौ शुक्लाश्वे दर्प्पणे घटे ॥१७॥ कङ्कः श्रेष्ठ द्विजे ख्यातो लोहपृष्ठ

मेदि०
२
(3)

कृतान्तयोः॥ कल्कोऽस्त्री घृततैलादिशेषे दम्भे बिभीतके॥१८॥ विट्कं द्वयोश्च पापे च त्रिषु मापा
शये पुनः॥ काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि॥१९॥ शिरोऽवक्षालने मानप्रभेदे द्वीप
भेदयोः॥ काका स्यात्काकनासायां काकोली काकजंघयोः॥२०॥ रक्तिकायामामलक्यां काकमा
च्यां च योषिति॥ काकं स्यात्सुरतबन्धे स्यात्काकानामपि संहतौ॥२१॥ किष्कुर्द्वयोर्वितस्तौ प्रकोष्ठेऽपि
करेऽपि च॥ कोकश्चक्रे चक्रेऽन्ये क्ष्यां खर्जूरीद्रुमदर्दुरे॥२२॥ छेको गृहाश्रितमृगपक्षिणोर्नाग
रे त्रिषु॥ टङ्को नीलकपित्थे च खनित्रे टंकनेऽस्त्रियाम्॥२३॥ जङ्घायां स्त्री पुमानकोपोऽसिको
शे ग्रामदारणे॥ तर्कः कांक्षावितर्कोहहेतुशास्त्रेषु कथ्यते॥२४॥ त्रिकाकूपस्य नेमौ स्यात्त्रिकं २
पृष्ठाधरे त्रये॥ लोकं पुत्रे स्कतायाश्च द्विकः स्यात्काककोकयोः॥२५॥ न्यंकुस्तु ना मृगे पुंसि नाक
स्तु त्रिदिवेऽम्बरे॥ नाकुर्मुन्यन्तरे पृथ्वीधरवल्मीकयोः पुमान्॥२६॥ निष्कमस्त्री साष्टहेमशते

(3A)

दीनारकर्षयोः॥वक्षोऽलङ्करणेहेमपात्रेहेमपलेपिच॥२७॥पकोऽस्त्रीकर्द्दमेपापेपाकःपरि
णतौशिशौ॥केशस्यजरसाशौक्ल्येस्यात्प्रायादौपचतेपिच॥२८॥बकस्तुबकपुष्पेस्यात्कह्वेश्रीदेच
रक्षसि॥भूकंछिद्रेचकालेचभेकोमंडूकमेघयोः॥२९॥मुष्कोमोक्षकवृक्षेस्यात्संहतौवृषणेपि
च॥मूकस्त्ववाचिनादैन्येरंकःकृपणमंदयोः॥३०॥एकानघस्तुरेकच्छुंनवजातरजःस्त्रियाम्
सम्पूर्णोदुलिथौरेकःशंकायांचविरेचने॥३१॥एकस्तुक्रयभिद्वीप्सोरोकंनाविचलैविले॥लं
कारक्षःपुरीशाखाशाकिनीकुलटासुच॥३२॥लोकोजनेपिभुवनेवल्कंवल्कलशल्कयोः॥वं
कःपर्य्याणभागेनानदीपात्रेचभंगुरे॥३३॥शल्कंतुशकलेवल्केशाकोजात्यन्तरेन्तपे॥शंकुःसं
ख्याऽस्त्रयादोभित्कीलंशाकलुषेषुना॥३४॥शंकात्रासेवितर्केचशाकोद्वीपान्तरपिच॥शाको
द्रुमविशेषेचपुमान्हरितकेऽस्त्रियां॥३५॥शुकोव्यासस्ततेकीरेरावणस्यचमंत्रिणि॥शिरीष

पादपेपुंसिग्रंथिपर्णेनपुंसकम्॥३६॥शुल्कंघट्टादिदेयेस्याद्धरादर्थग्रहेऽस्त्रियाम्॥श्रूकोऽस्त्री
शुङ्गदययोःश्लोकःपद्येयशस्यपि॥३७॥शौकंशुकगणेस्त्रीणांकरणेस्तूकइत्यपि॥वाणवातो
त्पलेस्तोकस्त्रिष्वल्पेघातकेपुमान्॥३८॥कत्रिः॥अशोकंत्रिषुनिःशोकेपुंसिकंकेल्लिपादपे॥
(५) स्त्रीयांतुकटुरोहिण्यांपारदेस्यान्नपुंसकम्॥३९॥अलकाकुबेरपुर्य्यामास्त्रियांचूर्णकुन्तले॥अ
भीकःकामुकेक्रूरेनिर्भयेत्रिषुनाकवौ॥४०॥अनीकोऽस्त्रीरणेसैन्येप्यणुकोनिपुणाल्पयोः॥
अलीकमप्रियेपिस्याद्दिव्यसत्येनपुंसकम्॥४१॥अनूकंतुकुलेशीलेपुंसिस्याद्गतजन्मनि॥अं
शुकंश्लक्ष्णवस्त्रेस्याद्वस्त्रमात्रोत्तरीययोः॥४२॥अन्तिकंनिकटेवाच्यलिङ्गंस्त्रीशातलौषधौ॥
चुल्ल्यांज्येष्ठभगिन्यांचनाट्योक्त्यांकथ्यतेऽन्तिका॥४३॥अलर्कोधवलार्केस्याद्योगोन्मादित २
कुक्कुरे॥अम्बिकापार्वतीमात्रोर्ध्तराष्ट्रस्यमातरि॥४४॥अम्बिकाधूतभेदेचरजन्यामपियो

(5A)

बिति॥अम्लिकातित्तिडीकाम्लोद्गारश्चाङ्केरिकासुच॥४५॥अर्भकःकथितोवालेमूर्खेपिच
कृशेपिच॥आनकःपटहेभेर्य्यांमृदङ्गेध्वनदम्बुदे॥४६॥आढकोतुतुवर्य्यांस्त्रीपरिमाणान्त
रेत्रिषु॥आलोकस्तुपुमान्द्योतेदर्शनेवंदिभाषणे॥४७॥आन्हिकंदिननिवर्त्येत्रिलिङ्गमथ
नद्वयोः॥नित्यक्रियाभाजनयोर्द्वन्द्वेप्रकरणस्यवा॥४८॥आतंकोरोगसंतापशंकासुमुरज
ध्वनौ॥इक्ष्वाकुःकटुतुंब्यांस्त्रीसूर्य्यवंशनृपेपुमान्॥४९॥उलूकःपुंसिकाकाराविन्द्रेभारत
योधिनि॥उदर्कःश्वःकालीनफलेमदनकंटके॥५०॥उष्मकस्तुनिदाघेस्यादातुरेक्षिप्रका
रिणि॥उल्मुकाम्लत्तिकाभांडमेदेविकरभोस्त्रियां॥५१॥ऊर्मिकाचांगुरीयेस्याद्वस्त्रभंगतरं
गयोः॥कनकंहेम्निपुंसिस्यात्किंशुकेनागकेसरे॥५२॥धत्तूरेकांश्वनालेचकालीयेचम्प
केपिच॥५३॥करकस्तुपुमान्पक्षिविशेषेदाडिमेपिच॥५३॥द्वयोर्मेघोपलेनस्त्रीकरकःच

मेदि०
४

(5)

कमण्डलौ॥ क्रमुकस्तु पुमान्भद्रमुस्तके ब्रह्मदारुणि॥५४॥ फलेकार्पासिकायांचपट्टिकाध्रेलो
पूगयोः॥ कटकोऽस्त्री नितम्बेऽद्रेर्दन्तिनान्दन्तमण्डले॥५५॥ सामुद्रलवणेराजधानीवलय
योरपि॥ कटुकाकटुरोहिण्यांस्त्रियांव्योषेनपुंसके॥५६॥ कंटकोनस्त्रियांक्षुद्रशत्रौमत्स्या
दिकीकसे॥ नैय्योगिकादिदोषौस्तौ स्याद्रोमाञ्चेद्रुमांगयोः॥५७॥ करकोमस्तकेऽशास्यनारि
केलफलास्थिनि॥ कलंकोऽङ्केऽपवादेचकालायसमलेपिच॥५८॥ कर्णिकाकरिहस्ताग्रेकरम
ध्यांगुलावपि॥ क्रमुकादिच्छगांशोक्तवराटेकर्णभूषणे॥५९॥ कणिकाकथ्यतेऽलन्तसूक्ष्मवस्त्व
ग्निमन्थयोः॥ कचाकुस्तुदुराधर्षेदुःशीलेचविलेशये॥६०॥ कञ्चुकोवारणेस्यात्रिर्मोकेकरभे ४
पिच॥ वर्द्धापकगृहीतांगास्थितवस्त्रेचचोलके॥६१॥ कञ्चुक्योषधिभेदेऽथकारिकानट्योषि
ति॥ कृतौविवरणश्लोके शिल्पयातनयोरपि॥६२॥ नपुंसकस्तुकर्म्मादौकारकंकर्त्तरित्रिषु॥ का

(5A)

मुकः कामनेऽशोकपादपेच तिमुक्तके ॥६३॥ कार्मुकन्धनुषिस्याच्चावेणौकर्म्मक्षमेऽन्यवत्॥
काचूकः कृतवाकौस्यात्पीतमस्तककोकयोः ॥६४॥ क्षारकः पक्षिमत्स्यादिपिटकेजालके
च ॥ कालिकाचर्चिकाभेदेकालत्र्यंवृश्चिकपत्रयोः ॥६५॥ क्रमदेयेवस्त्रमूल्येधूसरीनवमेघ
योः ॥ पटोलशाखारोमालीमांसीकाकीशिवास्वच ॥६६॥ मेघावलौचकिम्पाकोमहाकालफ
लाज्ञयोः ॥ कीचकोदैत्यभिद्वातहतसस्वनवंशयोः ॥६७॥ कीटकः कृमिजातौनानिष्ठुरेपुनर
न्यवत् ॥ कुलकन्तुपटोलेस्यात्सम्बद्धश्लोकसंहतौ ॥६८॥ पुंसिवल्मीककाकेन्दुकुलश्रेष्ठेषुक
थ्यते ॥ क्षुल्लकस्त्रिषुनीचेऽल्पेकुत्सितोमुनिसर्जयोः ॥६९॥ कृषाकुः कपिवह्न्यर्केनापरोत्तापि
नित्रिषु ॥ कुलिकोनागभेदेस्याद्द्रुभेदेकुलसत्तमे ॥७०॥ क्षुरकः कोकिलाक्षेस्याद्गोक्षुरेतिल
कद्रुमे ॥ कूपकोगुणवृक्षेस्यात्तैलपात्रेकुकुन्दरे ॥७१॥ उदपानेऽच्युतयान्तुकूपिकाऽम्भोगतो

मेदि० पले॥ कूलकं न स्त्रियां स्तूपे पुंसि स्यात्तु भूमिपर्वते॥७२॥ कूर्चिका सूचिकायां च तूलिकायां च कु
५ ड्मले॥ कपाटी कुडके क्षीरविकृतावपि योषिति॥७३॥ कृषकः पुंसि फाले स्यात्कर्षके त्वभिधेय
वत्॥ कोरकोऽस्त्री कुड्मले स्यात्कक्कोलके मृणालयोः॥७४॥ कौतुकं त्वभिलाषे स्यादुत्सवे नर्मह
र्षयोः॥ तथा परम्परायातमंगले च कुतूहले॥७५॥ विवाहसूत्रगीतादिभोगयोरपि न द्वयोः॥ कौ
(6) शिको नकुले व्यालग्राहे गुग्गुलुराजयोः॥७६॥ कोषजो लूकयोश्च स्याद्विश्वामित्रमुनावपि॥ कौ
शिका चण्डिकायां च नदीभेदे च योषिति॥७७॥ खनको नोन्दुरौ सन्धिचौरे त्रिषु ददारके॥ खं
गिको महिषी क्षीरफेण शौनिकयोरपि॥७८॥ स्यात्खोलकः स्तूपाके शिरस्त्रवल्मीकपूगकोषेषु ५
गणिकायूथीवेश्याभीतकीरीषु नातु दैवज्ञे॥७९॥ ग्रन्थिकश्चिप्पलीमूले गुग्गुलुग्रन्थिपर्णयोः
करीरे पुंसि दैवज्ञे सहदेवाख्यपाण्डवे॥८०॥ गण्डकः पुंसि खड्गे स्यात्संख्याविघ्नप्रभेदयोः॥ अव

(6A)

च्छेदेऽन्तरायेचगण्डकीसरिदन्तरे॥८१॥ग्राहकोघातिविहगेधान्यानाञ्चग्रहीतरि॥गान्धि
कोलेखकेपिस्यात्स्कगान्धिव्यवहारिणि॥८२॥गण्डकोमलनेधूलौकलोक्तिस्नेहपात्रयोः॥ग्र
ह्यकोनिघ्रकेलेकेगैरिकन्धातुस्कन्नणोः॥८३॥गोलकोविधवापुत्रेजारात्स्यान्मलिकेगुडे॥गो
रंकुःस्यात्पुमान्पक्षिभेदेलग्नकवन्दिनोः॥८४॥चषकोऽस्त्रीस्करापात्रेमधुमद्यप्रभेदयोः॥चु
लुकःप्रसृतौभाण्डभेदेचुलुकवत्पुमान्॥८५॥चतुष्कीमसकहर्म्यांपुष्करिण्यन्तरेपिच॥चारकः
पालकेऽश्वादेःस्यात्सञ्चालकबन्धयोः॥८६॥चित्रकंतिलकेनातुव्याघ्रभिच्चस्त्रुपाठिषु॥चुम्बक
श्चुम्बनपरेधूर्त्तायस्कान्तयोरपि॥८७॥बकुग्रन्थैकदेशाज्ञेघटस्योर्ध्वावलम्बने॥चुल्लकीशिशुमा
रेपिकुण्डीभेदेकुलान्तरे॥८८॥चूलिकानाढकस्यागेकर्णमूलेचहस्तिनां॥चूतकःकूपकेप्यात्रेज
नकःपितृभूभुजोः॥८९॥जम्बूकःफेरवेनीचेपश्चिमाशापतावपि॥जतुकाजिनपत्रायांजतुकंहिंगु

मेदि॰
६

(7)

लाक्षयोः ॥९०॥ जाहको घोङ्घः मार्जारखट्वाकारूण्डिकासु च ॥ जालकं कोरके दम्भे कुलायानाय्ययो
रपि ॥९१॥ नपुंसि मोचकफले स्त्रियां तु वसनान्तरे ॥ गिरिसारे जलौकायामपि स्याद्द्विधवा स्त्रियां ॥
॥९२॥ भटानामस्मरचित्तांगरक्षिण्यां च जालिका ॥ जालिको वाच्यवद्ग्रामजालिजालोपजीविनोः
॥९३॥ जीवकः प्राणके पीतशालक्षपणयोरपि ॥ कूर्चशीर्षेपि पुंसि स्याद्दाजीवे जीविका मता ॥९४
त्रिषु सेवि निवध्याग्नि जीवनो रोहितुण्डुके ॥ डल्लिको द्वर्तनपटे स्त्रियां चोते च ड्डेल्लिका ॥९५॥ आ
तपस्यरुचौ क्लिंठ्यां तु एडुकः शोणकाल्पयोः ॥ डम्बिका जलविम्बे स्यान्मोणके कामुका स्त्रियां ॥९६
तण्डकः खञ्जने फेणे समासप्रायवाचि च ॥ गृहदारुतरुस्कन्धमायाबहुलकेष्वपि ॥९७॥ तक्ष
कस्तु पुमान्नागराजभेदे च वर्द्धकौ ॥ तारको दैत्यभित्कर्णधारयोर्नद्धयोर्दृशि ॥९८॥ कनीनिका
यामक्षे च नपुमांस्त्वात्तरि त्रिषु ॥ तिलको द्रुमरोगाश्वभेदे च तिलकालके ॥९९॥ क्लीबं सौवर्चल

६

क्लोम्लोर्न्नस्त्रियान्तुविशेषके॥ त्रिशंकुर्नाराजभेदेशलभेतृपदंशके॥१००॥ तुरुष्कःसिह्लकेम्लेच्छ
जातौदेशान्तरेऽपिच॥ तूलिकाकूर्च्चिकायाञ्चशय्योपकरणेपिच॥१०१॥ दर्शकःस्यात्प्रतीहारे
दर्शयितृप्रवीणयोः॥ दारकोबालकेपिस्याद्भेदकेप्यभिधेयवत्॥२॥ दारकोग्रावभेदेस्याद्विदग्धे
(7A) मोषकेपिच॥ दीपकंवागलंकारेवाच्यवद्दीपिकारके॥१०३॥ दीपकश्चाजमोदायांयवानीबर्हिचू
डयोः॥ इच्छकीगन्धकुट्यांस्याद्विहाराघवकाशके॥४॥ दूषिकातूलिकायाञ्चमलेस्याल्लोचनस्य
च॥ धनिकासाधुनार्य्योनाधन्याकेत्रिषुसाधुधनिनोश्च॥५॥ स्याद्धेनुकाकरिण्यांधेनावपिनातु
दानवविशेषे॥ धैनुकंकरणेस्त्रीणांधेनूनामपिसंहतौ॥६॥ नर्त्तकःकेवलेपोठगलचारणयोर्नटे
नर्त्तकीलासिकायाञ्चकरेण्वामपियोषिति॥७॥ नग्निकापिकुमार्य्यांस्यात्पुमान्क्षपणवन्दिनोः॥
नरकःपुंसिनिरयदैवारात्रिप्रभेदयोः॥८॥ नन्दकीहरिखंगेचहर्षकेकुलपालके॥ नालीकःशरश

(8)

ल्यांगेध्वजेषण्डेनपुंसकं॥१०९॥नायकोनेतरिश्रेष्ठेहारमध्यमणावपि॥निर्मोकोमोचने
व्योम्निसन्नाहेसर्पकञ्चुके॥१०॥नीलिकानीलिकाक्षुद्रारोगश्रेफालिकासुच॥पराकस्तुव्रते
खड्गे·प्रसेकःसेचनेश्च्युतौ॥११॥प्रतीकोऽवयवेपिस्यात्प्रतिकूलविलोमयोः॥पद्मकंस्यात्
पद्मकाष्ठबिन्दुजालकयोरपि॥१२॥पक्षकस्तुपुमान्पार्श्वद्वा-रेचपार्श्वमात्रके॥पल्यंकोम
ञ्चपर्य्यंकवृषीपर्य्यस्तिकासुच॥१३॥पताकावैजयन्त्यांचसौभाग्येनाटकांगयोः॥पातुकः
पतयालौस्यात्प्रपातजलहस्तिनोः॥१४॥प्राणकःसत्वजातीयेजीकवद्रुमचोलयोः॥पाट
कःस्यान्महाकिष्कौकटकान्तरवाद्ययोः॥१५॥अक्षादिचोलनेमूलद्रव्यापचयरोधसोः॥पा
लंकःशाल्लकीशाकभेदयोःश्राजिपक्षिणि॥१६॥पावकोसदाचारेवन्हिमन्थेचचित्रके॥भल्ला
तकेविडंगेप्याप्रियकःपीतशालके॥१७॥नीपेचित्रमृगेचालौप्रियंगौकुंकुमेपिच॥पिण्याकोऽ ७

(8A)

स्त्रीतिलकल्केहिंगुवाल्हीकसिल्हके॥१८॥पिनाकोऽस्त्रीरुद्रचापेपांशुवर्षत्रिशूलयोः॥वि
टकस्त्रिषुविस्फोटेमञ्जुषायांपुनःपुमान्॥१९॥विष्टकोघृतपूपादौनेत्ररोगांतरेपिच॥पुल
कःकृमिप्रभेदेप्रस्तरभेदेचमणिदोषे॥२०॥रोमांचेहरितालेगजान्नपिंडेचगन्धर्वे॥पुला
कस्तुच्छधान्येस्यात्संक्षेपेभक्तसिक्थके॥२१॥पुष्पकंरीतिपुष्पेचविमानेधनदस्यच॥नेत्ररोगे
तथारत्नकंकणेचरसाञ्जने॥२२॥लोहकांस्येमृदंगारशाकट्यांश्चनपुंसकम्॥स्यात्पुत्रि
कापुत्तलिकादुहित्रोर्यावत्तूलके॥२३॥नापुत्रेसरभेधूर्त्तेशैलवृक्षप्रभेदयोः॥पूर्णकःस्वर्ण
चूडेस्यान्नासाछिन्नातुपूर्णिका॥२४॥पृदाकुर्वृश्चिकेव्याघ्रेसर्पचित्रकयोःपुमान्॥पृथुकःपुं
सिचिपिटेशिशौस्यादभिधेयवत्॥२५॥पेचकोगजलांगूलमूलोपान्तेचकौशिके॥पेटकंपुस्त
कादीनांमञ्जूषायांकदम्बके॥२६॥वल्मीकोरोगभेदेचनाकौचपुंनपुंसकं॥बन्धुकंबन्धुजीवेस्या

(9)

हृन्धूकः पीतशालके ॥२७॥ बन्धकस्स्याद्विनिमये पुंश्चल्यां स्याच्च बन्धकी ॥ बाहुकः कर्कटे चा
केदारस्थहेजलखातके ॥२८॥ बराकः शंकरे पुंसि शोचनीयेऽभिधेयवत् ॥ बालकस्तु शिशावाज्ञे
वलधौ हयहस्तिनोः ॥२९॥ अंगुरीयकहीदे रवलये पुंसि वालिका ॥ बालायां बालुकापुत्रकाहुला
कर्णभूषणे ॥३०॥ वारकोऽश्वगतौ पुंसि वाप्यवस्त्रा निषेधके ॥ वालुकासिकतास्त्रकस्याद्वालुकं ले
लवालुके ॥३१॥ भर्म्मकं रोगभेदस्याद्विडंकं कलधौतयोः ॥ भ्रामको जम्बुके धूर्त्ते सूर्य्यावर्त्ताश्म
भेदयोः ॥३२॥ भालांकः करपत्रे स्याच्छाकभेदे च रोहिते ॥ महालक्षणसम्पन्नपुरुषे कच्छपे
हरे ॥३३॥ भूमिमारच्चनायां स्याद्दशान्तरपरिग्रहे ॥ भूतीकमपि भूनिम्बे दीपकर्पूरकेतृणे ॥
३४॥ मधुकामधुपर्ण्यां स्यान्मधुकं क्लीतके खगे ॥ वल्लंन्तरे नामशाको रोगकीटप्रभेदयोः ॥३५॥ ८
मंएडुकः शोणके मुन्यन्तरे स्याद्भुदवर्च्चसि ॥ मण्डुकपर्ण्यां मण्डुकी मल्लिको हंसभिद्यपि ॥३६॥

मल्लिकातृणशून्येपिमीनमृत्पात्रभेदयोः॥मामकंस्यात्मदीयार्थेत्रिषुपुंसिमुमातुले॥३७
मातृकाधातृकाधात्रोर्देवीभिद्वर्णमालयोः॥मालिकास्त्रसलाप्रुत्रीग्रीवालङ्कारणेषुच॥३८॥पुष्पमा
ल्येनदीभेदेपक्षिभेदेतुमालिकः॥मेचकस्तुमयूरस्यचन्द्रकेश्यामलेपुमान्॥३९॥तद्युक्तेवाच्य
वत्क्लीवंस्रोतोञ्जतान्धकारयोः॥मोचकःकदलीशिग्रुनिर्मोचकविरागिषु॥४०॥मोदकःखा
द्यभेदेऽस्त्रीहर्षुकेपुनरन्यवत्॥यमकंयमजेशब्दालंकारेपुंसिसंयमे॥४१॥याजकस्तुगजेरा
ज्ञोयाज्ञिकेऽप्यथयाज्ञिकः॥याजकेचकुशेचाथयुक्तकंसंशयेयुगे॥४२॥नारीवस्त्राञ्चलेयुक्ते
चलनाग्रेऽविपीतके॥यूथिकाम्लानकेपुष्पविशेषेपिचयोषिति॥४३॥रसिकास्त्रीरसालेक्षुरस
योःसरसेत्रिषु॥रक्तकोबन्धूकरक्तवस्त्रानुरागिषु॥४४॥राजिकेपिचकेदारेराजसर्षप
रेखयोः॥रात्रकंपञ्चरात्रेमा[illegible]विशमाब्दवासिनि॥४५॥रुचकोबीजपूरेचनिष्केदन्तकपोतयोः॥

नद्द्योः सार्जिकारेप्वश्वाभरणमाल्ययोः ॥४६॥ सौवर्च्चले पि मांगल्यद्रव्ये चाप्युलूकटे पि चा
रुण्डिकाद्वारपिण्ड्यां च दूतिकायां रणक्षितौ ॥४७॥ रूपकं नाटके मूर्त्तौ काव्यालंकरणे पि चा
रेणुका विहरेणौ च जामदग्न्यस्य मातरि ॥४८॥ रोहकः प्रेतभेदे ना रोढरि त्रिषु विश्रुतः ॥ लम्पा
को लम्पटे देशे लासको लास्यकारिणी ॥४९॥ मयूरे लसके चाथ लूनको भेदिते पशौ ॥ लोचको
मांसपिण्डेऽक्षितारकायां च कज्जले ॥५०॥ ललाटाभरणे स्त्रीणां कदलीनीलवस्त्रयोः ॥ नि
र्बुद्धौ कर्णपूरे च मूर्व्यां भ्रूभ्रूलथ चर्म्मणि ॥५१॥ वस्तकं रौमके पुंसि शिवमल्ल्यर्कपर्णयोः ॥ व
र्णकश्चारणे स्त्री तु चन्दने च विलेपने ॥५२॥ द्वयोर्माल्यादिपुस्त्री स्यादुत्कर्षे क्वाथनस्य च ॥ व
र्त्तकस्तु खुरेऽश्वस्य विग्रहे वर्त्तकी द्वयोः ॥५३॥ वञ्चकस्तु खले धूर्त्ते गृहबभ्रौ च जम्बुके ॥ व्यली
कमप्रियाकार्य्यवैलक्ष्ये चापि पीडने ॥५४॥ ना नागरेऽथ वाह्लीकं वाह्लिकं धीरहिङ्गुनोः ॥ द्वावे

(10)

(10A)

तौपुंसिदेशस्यप्रभेदेतुरगान्तरे॥५५॥वार्द्धकंवृद्धसंधानेवृद्धस्यभावकर्मणोः॥वार्धिकंत्राय
माणायांक्लीवंवर्षाभवेत्रिषु॥५६॥वालकोऽस्त्रीपारिहार्य्येत्रिषुस्यादंगुरीयके॥वितर्कस्तुपुमा
नूहेसंशयेचनिगद्यते॥५७॥विपाकःपचनेस्वादेकर्मणोविसदृक्फले॥विवेकस्यांजलद्रोण्यां
पृथग्भावविचारयोः॥५८॥वृश्चिकश्चद्रुणोराशौश्शुककोटौषधीभिदोः॥वृषांकःशंकरेसाधौभ
ल्लातकमहत्वयोः॥५९॥वैजिकंशिग्रुतैलेस्याद्धेतौसद्योऽङ्कुरेतुना॥शलाकाशल्यमदनशारि
काशाल्लकीषुच॥६०॥छत्रादिकाष्ठीशारयोःशल्लकीपश्नुवृक्षयोः॥शम्बूकोगजकुम्भान्तेघोङ्केच
शूद्रतापसे॥६१॥जलजन्तुविशेषेचशम्बुकाननपुंसकम्॥शंखकम्बलयेकम्बावस्त्रीपुंसिशि
रोरुजि॥६२॥शार्ककःस्याद्दुग्धफेनशर्करापिण्डयोःपुमान्॥शिशुकःशिशुमारेस्याद्बालकोलू
पिनोरपि॥६३॥शीतकःशीतकालेचसुस्थितेदीर्घसूत्रिणि॥शूककःप्रावटेपिस्याद्रसेपिपरिकी

मेदि०
१०

(८१)

र्तितः॥६४॥सस्यको मणिभेदेऽसौ सम्यकौ मेलकेरतौ॥सम्याकस्तर्के केघष्टे त्रिषु ना चतु
रङ्गुले॥६५॥स्यमीकानीलिकायां स्त्री स्यमीको नाकुवृक्षयोः॥स्वस्तिको मंगलद्रव्ये चतुष्क
गृहभेदयोः॥६६॥सरकोऽस्त्री सीधुपाने सीधुपात्रेक्षुसीधुनोः॥अच्छिन्नाध्वगपङ्क्तौ च सा
यकः शरखड्गयोः॥६७॥स्थासकः पुंसि चार्चिक्ये जलादेरपि वुद्बुदे॥सूचकः सीवनद्रव्ये बो
धके पिशुने श्वुनि॥६८॥ओतौ काके सूतकोऽस्त्री पारदे नद्धयोर्जवौ॥सूदाकुर्नानिले वज्रे ज्व
लने प्रतिसूर्य्यके॥६९॥सेवकस्तु प्रसेवे ना वाच्यलिंगोनुजीविनि॥सेचकः स्यात्पुमान्मेघे
वाच्यलिंगस्तु सेक्तरि॥७०॥सैनिकः सैन्यरक्षे च स्यात्सेनासमवेतके॥हारकः कितवे चौरे ग
द्यविज्ञानभेदयोः॥७१॥कुडुक्को वाद्यभेदे च मत्तदात्यूहपक्षिणि॥हेरुको बुद्धभेदे स्यान्महाका १०
लगणेपि च॥७२॥क्वचतुः भवेदलिमको भेके पिके लोपद्मकेसरे॥मधूकेऽप्यथालिपको स्त्र

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com